# 209

III

Total No. of Questions – 16

Total No. of Printed Pages – 4

Regd. No.

## Part – II
## SANSKRIT, Paper - II
(Second Language)

*Time : 3 Hours ]* *[ Max. Marks : 100*

Note : (1) **All** questions should be attempted

(2) Question Nos. **1, 2 & 3** should be answered either in the medium of instructions of the candidate or Sanskrit (Devanagari Script)

(3) The remaining questions should be answered in Sanskrit (Devanagari Script) only.

सूचना प्रथम, द्वितीय, तृतीय प्रश्नान् विहाय अन्ये सर्वेऽपि प्रश्नाः संस्कृतभाषायामेव समाधातव्याः ।

1. एकस्य श्लोकस्य प्रतिपदार्थं भावं च लिखत । 1 × 8 = 8

(अ) गुणस्तवेन कुर्वीत महतां मानवर्धनम् ।

हनुमानभवत् स्तुत्या रामकार्यभरक्षमः ॥

(आ) दरिद्राणां कृते यस्य हृदयं परितप्यते ॥

स महात्मेत्यहं वच्मि तद्विरुध्यो दुरात्मकः ॥

2. एकं निबन्धप्रश्नं समाधत्त । 1 × 6 = 6

(अ) गङ्गावतरणे रतस्य भगीरथस्य प्रयत्नं संग्रहेण लिखत ।

(आ) हरिश्चन्द्रः सत्यमेव जयते इति कथं निरूपितवान् ?

3. एकं निबन्धप्रश्नं समाधत्त । 1 × 6 = 6

(अ) बाणभट्टः अनाथपरिपालनकथां कथं वर्णितवान् ?

(आ) दधीचेः दानगुणमधिकृत्य लिखत ।

4. त्रयाणां प्रश्नानां समाधानं लिखत । $3 \times 2 = 6$

(अ) आश्रमपदे रामः सीता लक्ष्मणः च कथं स्थिताः ?

(आ) आत्मनः वनगमनविषये रामः भरतं किमवदत् ?

(इ) वासुकिना गरुत्मान् किमिति अभिहितः ?

(ई) गरुडेन कः त्वमिति पृष्टः जीमूतवाहनः किमवदत् ?

(उ) पितृसद्मगोचरः अपि शिवः कीदृशः ?

(ऊ) ऐरावताधिरूढः देवेन्द्रः किमर्थं प्रतीक्षते ?

5. द्वयोः ससन्दर्भं व्याख्यानं लिखत : $2 \times 3 = 6$

(अ) सगरस्यात्मजाः सर्वे मत्तः सलिलमाप्नुयुः ।

(आ) ध्रुवमूष्मणि दारुणो दवाग्निः ।

(इ) गृहकृत्याय निवृत्यतां लघु ।

(ई) ननु भोः मातुः, शिशुं मा भिदः ।

6. द्वयोः ससन्दर्भं व्याख्यानं लिखत । $2 \times 3 = 6$

(अ) अहो प्रभावः तपसाम् ।

(आ) भो भोः ! मा भैष्ट भद्राः ।

(इ) ईदृशस्य नृपस्य राज्ये जलपानमपि अधर्मः ।

(ई) मन्ये इदं मम परमं सौभाग्यम् ।

7. त्रयाणां प्रश्नानां समाधानं लिखत । $3 \times 2 = 6$

(अ) हरः गङ्गां किं प्रति विससर्ज ?

(आ) विश्वकर्मा किमर्थं खड्गं व्यरचयत् ? कस्मै प्रादात् ?

(इ) कस्मात् युधिष्ठिरः नरकक्लेशं ददर्श ?

(ई) किं त्यागेनैव उपलभ्यते ?

(उ) नृपः किमिति निश्चयमागतः ?

(ऊ) भक्तः किमर्थं पुष्पवनम् अगच्छत् ?

8. त्रयाणां प्रश्नानां समाधानं लिखत । $3 \times 2 = 6$

(अ) बाणभट्टेन विरचितं काव्यद्वयम् किम् ?

(आ) मेधावां गणस्य नाम किम् ?

(इ) अन्ते वीरः राजानं किमवोचत् ?

(ई) कदा नरेन्द्रस्य विस्मयः द्विगुणः अजायत ?

(उ) चूडाला स्वपतिदेवं किमिति अवदत् ?

(ऊ) कः स्वर्गराज्यम् आक्रम्यत् ?

9. एकेन वाक्येन समाधानं लिखत ।  5 × 1 = 5

(अ) भगीरथः कुत्र तपः अतिष्ठत् ?

(आ) मधुरापुरी कं प्रादुर्भावयत् ?

(इ) कतिभिः दिनैः चाणक्यः नन्दान् अपातयत् ?

(ई) किं मृत्युः उच्यते ?

(उ) पुष्पविलापः संस्कृते केन अनूदितः ?

10. एकेन वाक्येन समाधानं लिखत ।  5 × 1 = 5

(अ) शुकस्य नाम किम् ?

(आ) कृष्णचरितं केन विरचितम् ?

(इ) वीरः राज्ञः कण्ठे कीदृशीं दिव्यमालां समर्पितवान् ?

(ई) सिद्धपुरुषः कः ?

(उ) उज्जयिन्याः राजा कः ?

11. अधोनिर्दिष्टं कथां पठित्वा प्रश्नानां समाधानानि दत्त ।  5 × 1 = 5

उज्जयिन्यां भट्टिः नाम कोऽपि ब्राह्मणः आसीत् । तस्य अभयाम्बा नाम भार्या, कमलाकरो नाम तनयः च आस्ताम् । एकपुत्रौ तौ दम्पती कमलाकरे नितान्तं प्रेमवन्तौ बभूवतुः । सः तु शरीरम् अलङ्कृत्य विद्यापराङ्मुखः विषयोन्मुखः च अभवत् । तथाविधं तम् आहूय भट्टिः कदाचिदेवम् उपदिदेश –

"मानवकुले जन्म महता पुण्येन लभ्यते । तत् लब्ध्वा अपि त्वमेवं दुर्वृत्तः असि । किञ्च तवायं विद्याभ्यासस्य कालः । इदानीं यदि विद्यां नाभ्यस्यसि तर्हि पश्चात्तव महासन्तापः भविष्यति । अपरं च यावत् अहं जीवामि तावत्त्वया विद्या अभ्यसनीया । पश्चात्तु सा दुर्लभा भवेत् ।"

प्रश्ना :

(1) उज्जयिन्यां कः आसीत् ?

(2) भट्टेः भार्यायाः नाम किम् ?

(3) भट्टेः तनयस्य नाम किम् ?

(4) का पश्चात् दुर्लभा भवति ?

(5) किं महता पुण्येन लभ्यते ?

12. नामनिर्देशपूर्वकं त्रीणि सन्धत्त । $3 \times 2 = 6$

(अ) शरत् + चन्द्रः (आ) तत + टीका

(इ) अय् + आदिः (ई) तत् + नाम

(उ) नमः + ते (ऊ) गुरुः + जयति

13. नामनिर्देशपूर्वकं त्रीणि विघटयत । $3 \times 2 = 6$

(अ) सज्जनः (आ) हरिष्टीकते

(इ) चिद्रूपम् (ई) जगन्नाथः

(उ) तपोवनम् (ऊ) बाल खादति

14. द्वयोः शब्दयोः सविभक्तिरूपाणि लिखत । $2 \times 6 = 12$

(अ) जलमुक् (आ) सम्यत्

(इ) पचत् (ई) यद् (स्त्री)

15. समासनामनिर्देशपूर्वकं त्रयाणां विग्रहवाक्यानि लिखत । $3 \times 2 = 6$

(अ) प्रतिदिनम् (आ) चोरभयम्

(इ) विद्याधनम् (ई) त्रिभुवनम्

(उ) चक्रपाणिः (ऊ) रामलक्ष्मणौ

16. अधोरेखाङ्कितपदं शुद्धीकृत्य वाक्यं लिखत । $5 \times 1 = 5$

(अ) युवकः क्रीडाङ्गणे क्रीडन्ति ।

(आ) वृक्षात् फलंम् अपतन् ।

(इ) युवां जलं पास्यथ ।

(ई) वयं विपणिं गमिष्यामि ।

(उ) एते भयेन धावति ।